श्रीमत्+वाग्भटविरचिते अष्टाङ्गहृदये कल्पसिद्धिस्थानम्।

प्रथमः+अध्यायः।

अथ+अतः+ वमनकल्पं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

वमने मदनं श्रेष्ठं, त्रिवृत्+मूलं विरेचने
नित्यम्+अन्यस्य तु व्याधिविशेषेण विशिष्टता॥1॥
फलानि न+अतिपाण्डूनि न च+अतिहरितानि+अपि।
आदाय+अह्नि प्रशस्तर्क्षे मध्ये ग्रीष्मवसन्तयोः॥2॥
प्रमृज्य कुशम्+उत्तोल्यां क्षिप्त्वा बद्ध्वा प्रलेपयेत्।
गोमयेन+अनु मुत्तोलीं धान्यमध्ये निधापयेत्॥3॥
मृदुभूतानि मध्विष्टगन्धानि कुशवेष्टनात्।
निष्कृष्टानि गते+अष्टाहे शोषयेत्+तानि+अथ+आतपे॥4॥
तेषां ततः सुशुष्काणाम्+उद्धृत्य फलपिप्पलीः।
दधिमध्वाज्यपललैः+मृदित्वा शोषयेत्+पुनः॥5॥
ततः सुगुप्तं संस्थाप्य कार्यकाले प्रयोजयेत्।
अथ+आदाय ततः+ मात्रां जर्जरीकृत्य वासयेत्॥6॥
शर्वरीं मधुयष्ट्या वा कोविदारस्य वा जले।
कर्बुदारस्य बिम्ब्या वा नीपस्य विदुलस्य वा॥7॥
शणपुष्प्याः सदापुष्प्याः प्रत्यक्+पुष्प्युदके+अथवा।
ततः पिबेत्+कषायं तं प्रातः+मृदितगालितम्॥8॥
सूत्रोदितेन विधिना साधु तेन तथा वमेत्।
श्लेष्मज्वरप्रतिश्यायगुल्मान्तर्विद्रधीषु च॥9॥
प्रच्छर्दयेत्+विशेषेण यावत्+पित्तस्य दर्शनम्।
फलपिप्पलिचूर्णं वा क्वाथेन स्वेन भावितम्॥10॥
त्रिभागत्रिफलाचूर्णं कोविदारादिवारिणा।
पिबेत्+ज्वरारुचिष्ठेवग्रन्थ्यपच्यर्बुदोदरी॥11॥
पित्ते कफस्थानगते जीमूतादिजलेन तत्।
हृद्दाहे+अधोस्रपित्ते च क्षीरं तत्+पिप्पलीशृतम्॥12॥
क्षैरेयीं वा कफच्छर्दिप्रसेकतमकेषु तु।
दध्युत्तरं वा दधि वा तच्छृतक्षीरसम्भवम्॥13॥
फलादिक्वाथकल्काभ्यां सिद्धं तत्+सिद्धदुग्धजम्।
सर्पिः कफाभिभूते+अग्नौ शुष्यत्+देहे च वामनम्॥14॥

स्वरसं फलम्+अज्ज्ञः+ वा भल्लातकविधिश्रृतम्।
आदर्वीलेपनात्+सिद्धं लीढ्वा प्रच्छर्दयेत्+सुखम्॥15॥
तं लेहं भक्ष्यभोज्येषु तत्+कषायान्+च योजयेत्।
वत्सकादिप्रतीवापः कषायः फलम्+अज्जजः॥16॥
निम्बार्कान्यतरक्वाथसमायुक्तः+ नियच्छति।
बद्धमूलान्+अपि व्याधीन् सर्वान् सन्तर्पणोद्भवान्॥17॥
राठपुष्पफलश्लक्ष्णचूर्णैः+माल्यं सुरूक्षितम्।
वमेत्+मण्डरसादीनां तृप्तः+ जिघ्रन् सुखं सुखी॥18॥
एवम्+एव फलाभावे कल्प्यं पुष्पं शलाटुः+ वा।
जीमूताद्याः+च फलवत् जीमूतं तु विशेषतः॥19॥
प्रयोक्तव्यं ज्वरश्वासकासहिध्मादिरोगिणाम्।
पयः पुष्पे+अस्य निर्वृत्ते, फले पेया पयस्कृता॥20॥
लोमशे क्षीरसन्तानं, दध्युत्तरम्+अलोमशे।
शृते पयसि दध्यम्लं जातं हरितपाण्डुके॥21॥
आसुत्य वारुणीमण्डं पिबेत्+मृदितगालितम्।
कफात्+अरोचके कासे पाण्डुत्वे राजयक्ष्मणि॥22॥
इयं च कल्पना कार्या तुम्बीकोशातकीषु+अपि।
पर्यागतानां शुष्काणां फलानां वेणिजन्मनाम्॥23॥
चूर्णस्य पयसा शुक्तिं वातपित्तार्दितः पिबेत्।
द्वे वा त्रीणि+अपि वा+आपोथ्य क्वाथे तिक्तोत्तमस्य वा॥24
आरग्वधादिनवकात्+आसुत्य+अन्यतमस्य वा।
विमृद्य पूतं तं क्वाथं पित्तश्लेष्मज्वरी पिबेत्॥25॥
जीमूतकल्कं चूर्णं वा पिबेत्+शीतेन वारिणा।
ज्वरे पैत्ते, कवोष्णेन कफवातात्+कफात्+अपि॥26॥
कासश्वासविषच्छर्दिज्वरार्ते कफकर्शिते।
इक्ष्वाकुः+वमने शस्तः प्रताम्यति च मानवे॥27॥
फलपुष्पविहीनस्य प्रवालैः+तस्य साधितम्।
पित्तश्लेष्मज्वरे क्षीरं पित्तोद्रिक्ते प्रयोजयेत्॥28॥
हृतमध्ये फले जीर्णे स्थितं क्षीरं यदा दधि।
स्यात्+तदा कफजे कासे श्वासे वम्यं च पाययेत्॥29॥
मस्तुना वा फलात्+मध्यं पाण्डुकुष्ठविषार्दितः।
तेन तक्रं विपक्वं वा पिबेत्+समधुसैन्धवम्॥30॥

भावयित्वा+आजदुग्धेन बीजं तेन+एव वा पिबेत्।
विषगुल्मोदरग्रन्थिगण्डेषु श्लीपदेषु च॥31॥
सक्तुभिः+वा पिबेत्+मन्थं तुम्बीस्वरसभावितैः।
कफोद्भवे ज्वरे कासे गलरोगेषु+अरोचके॥32॥
गुल्मे ज्वरे प्रसक्ते च कल्कं मांसरसैः पिबेत्।
नरः साधु वमन्येवं न च दौर्बल्यम्+अश्नुते॥33॥
तुम्ब्याः फलरसैः शुष्कैः सपुष्पैः+अवचूर्णितम्।
छर्दयेनत्+माल्यम्+आघ्राय गन्धसम्पत्+सुखोचितः॥34॥
कासगुल्मोदरगरे वाते श्लेष्माशयस्थिते।
कफे च कण्ठवक्त्रस्थे कफसञ्चयजेषु च॥35॥
धामार्गवः+ गदेषु+इष्टः स्थिरेषु च महत्सु च।
जीवकर्षभकौ वीरा कपिकच्छूः शतावरी॥36॥
काकोली श्रावणी मेदा महामेदा मधूलिका।
तद्रजोभिः पृथक्+लेहा धामार्गवरजोन्विताः॥37॥
कासे हृदयदाहे च शस्ता मधुसिताद्रुताः।
ते सुखाम्भोनुपानाः स्युः पित्तोष्मसहिते कफे॥38॥
धान्यतुम्बरुयूषेण कल्कः+तस्य विषापहः।
बिम्ब्याः पुनर्नवाया वा कासमर्दस्य वा रसे॥39॥
एकं धामार्गवं द्वे वा मानसे मृदितं पिबेत्।
तत्+शृतक्षीरजं सर्पिः साधितं वा फलादिभिः॥40॥
क्ष्वेडः+अतिकटुतीक्ष्णोष्णः प्रगाढेषु प्रशस्यते।
कुष्ठपाण्ड्वामयप्लीहशोफगुल्मगरादिषु॥41॥
पृथक् फलादिषट्कस्य क्वाथे मांसम्+अनूपजम्।
कोशातक्या समं सिद्धं तत्+रसं लवणं पिबेत्॥42॥
फलादिपिप्पलीतुल्यं सिद्धं क्ष्वेडरसे+अथवा।
क्ष्वेडक्वातं पिबेत्+सिद्धं मिश्रिम्+इक्षुरसेन वा॥43॥
कौटजं सुकुमारेषु पित्तरक्तकफोदये।
ज्वरे विसर्पे हृद्रोगे खुडे कुष्ठे च पूजितम्॥44॥
सर्षपाणां मधूकानां तोयेन लवणस्य वा।
पाययेत्+कौटजं बीजं युक्तं कृशरया+अथवा॥45॥
सप्ताहं वा+अर्कदुग्धाक्तं तत्+चूर्णं पाययेत्+पृथक्।
फलजीमूतकेक्ष्वाकुजीवन्तीजीवकोदकैः॥46॥

वमनौषधमुख्यानाम्+इति कल्पदिक्+ईरिता।
बीजेन+अनेन मतिमान्+अन्यानि+अपि च कल्पयेत्॥47॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां पञ्चमे कल्पसिद्धिस्थाने वमनकल्पः+ नाम प्रथमः+अध्यायः॥1॥
द्वितीयः+अध्ययायः।
अथ+अतः+ विरेचनकल्पं व्याख्यास्यामः।
इति हि स्म+आहुः+आत्रेयादयः+ महर्षयः।
कषायमधुरा रूक्षा विपाके कटुका त्रिवृत्।
कफपित्तप्रशमनी रौक्ष्यात्+च+अनिलकोपनी॥1॥
सा+इदानीम्+औषधैः+युक्ता वातपित्तकफापहैः।
कल्पवैशेष्यम्+आसाद्य जायते सर्वरोगजित्॥2॥
द्विधा ख्यातं च तन्मूलं श्यामं श्यामा+अरुणं त्रिवृत्।
त्रिवृदाख्यं वरतरं निरपायं सुखं तयोः॥3॥
सुकुमारे शिशौ वृद्धे मृदुकोष्ठे च तत्+हितम्।
मूर्च्छासम्मोहहृत्कण्ठकषणक्षणनप्रदम्॥4॥
श्यामं तीक्ष्णाशुकारित्वात्+अतः+तत्+अपि शस्यते।
क्रूरे कोष्ठे बहौ दोषे क्लेशक्षमिणि चातुरे॥5॥
गम्भीरानुगतं श्लक्ष्णम्+अतिर्यग्विसृतं च यत्।
गृहीत्वा विसृजेत्+काष्ठं त्वचं शुष्कां निधापयेत्॥6॥
अथ काले ततः+चूर्णं किञ्चित्+नागरसैन्धवम्।
वातामये पिबेत्+अम्लैः पैत्ते साज्यसितामधु॥7॥
क्षीरद्राक्षेक्षुकाश्मर्यस्वादुस्कन्धवरारसैः।
कफामये पीलुरसमूत्रमद्याम्लकाञ्जिकैः॥8॥
पञ्चकोलादिचूर्णैः+च युक्त्या युक्तं कफापहैः।
त्रिवृत्कल्ककषायाभ्यां साधितः ससितः+ हिमः॥9॥
मधुत्रिजातसंयुक्तः+ लेहः+ हृद्यं विरेचनम्।
अजगन्धा तवक्षीरी विदारी शर्करा त्रिवृत्॥10॥
चूर्णितं मधुसर्पिर्भ्यां लीढ्वा साधु विरिच्यते।
सन्निपातज्वरस्तम्भपिपासादाहपीडितः॥11॥
लिम्पेत्+अन्तः+त्रिवृतया द्विधाकृत्वा+इक्षुगण्डिकाम्।
एकीकृत्य च तत्+स्विन्नं पुटपाकेन भक्षयेत्॥12॥
भृङ्गैलाभ्यां समा नीलि तैः+त्रिवृत्+तैः+च शर्करा।

चूर्णं फलरसक्षौद्रसक्तुभिः+तर्पणं पिबेत्॥13॥
वातपित्तकफोत्थेषु रोगेषु+अल्पानलेषु च।
नरेषु सुकुमारेषु निरपायं विरेचनम्॥14॥
विडङ्गतण्डुलवरायावशूककणाः+त्रिवृत्।
सर्वतः+अर्धेन तत्+लीढं मध्वाज्येन गुडेन वा॥15॥
गुल्मं प्लीहोदरं कासं हलीमकम्+अरोचकम्।
कफवातकृतान्+च+अन्यान् परिमार्ष्टि गदान् बहून्॥16॥
विडङ्गपिप्पलीमूलत्रिफलाधान्यचित्रकान्।
मरीचेन्द्रयवाजाजीपिप्पलीहस्तिपिप्पलीः॥17॥
दीप्यकं पञ्चलवणं चूर्णितं कार्षिकं पृथक्।
तिलतैलत्रिवृच्चूर्णभागौ च+अष्टपलोन्मितौ॥18॥
धात्रीफलरसप्रस्थान्+त्रीन् गुडार्धतुलान्वितान्।
पक्त्वा मृद्वग्निना खादेत्+ततः+ मात्राम्+अयन्त्रणः॥19॥
कुष्ठार्शः कामलागुल्ममेहोदरभगन्दरान्।
ग्रहणीपाण्डुरोगान्+च हन्ति पुंसवनः+च सः॥20॥
गुडः कल्याणकः+ नाम सर्वेषु+ऋतुषु यौगिकः।
व्योषत्रिजातकाम्भोदकृमिघ्नामलकैः+त्रिवृत्॥21॥
सर्वैः समा समसिता क्षौद्रेण गुटिकाः कृताः।
मूत्रकृच्छ्रज्वरच्छर्दिकासशोषभ्रमक्षये॥22॥
तापे पाण्ड्वामये+अल्पे+अग्नौ शस्ताः सर्वविषेषु च।
अविपत्तिः+अयं योगः प्रशस्तः पित्तरोगिणाम्॥23॥
त्रिवृता कौटजं बीजं पिप्पली विश्वभेषजम्।
क्षौद्रद्राक्षारसोपेतं वर्षाकाले विरेचनम्॥24॥
त्रिवृद्दुरालभामुस्तशर्करोदीच्यचन्दनम्।
द्राक्षाम्बुना सयष्ट्याह्वसातलं जलदात्यये॥25॥
त्रिवृतां चित्रकं पाठाम्+अजाजीं सरलं वचाम्।
स्वर्णक्षीरीं च हेमन्ते चूर्णम्+उष्णाम्बुना पिबेत्॥26॥
त्रिवृता शर्करातुल्या ग्रीष्मकाले विरेचनम्।
त्रिवृत्त्रायन्तिहपुषासातलाकटुरोहिणीः॥27॥
स्वर्णक्षीरीं च सञ्चूर्ण्य गोमूत्रे भावयेत्+त्र्यहम्।
एष सर्वर्तुकः+ योगः स्निग्धानां मलदोषहृत्॥28॥
श्यामात्रिवृद्दुरालम्भाहस्तिपिप्पलिवत्सकम्।

नीलिनीकटुकामुस्ताश्रेष्ठायुक्तं सुचूर्णितम्॥29॥
रसाज्योष्णाम्बुभिः शस्तं रूक्षाणाम्+अपि सर्वदा।
ज्वरहृद्रोगवातासृगुदावर्तादिरोगिषु॥30॥
राजवृक्षः+अधिकं पथ्यः+ मृदुः+मधुरशीतलः।
बाले वृद्धे क्षते क्षीणे सुकुमारे च मानवे॥31॥
योज्यः+ मृद्वनपायित्वात्+विशेषात्+चतुरङ्गुलः।
फलकाले परिणतं फलं तस्य समाहरेत्॥32॥
तेषां गुणवतां भारं सिकतासु विनिक्षिपेत्।
सप्तरात्रात्+समुद्धृत्य शोषयेत्+आतपे ततः॥33॥
ततः+ मज्जानम्+उद्धृत्य शुचौ पात्रे निधापयेत्।
द्राक्षारसेन तं दद्यात्+दाहोदावर्तपीडिते॥34॥
चतुर्वर्षे सुखं बाले यावत्+द्वादशवार्षिके।
चतुरङ्गुलमज्ज्ञः+ वा कषायं पाययेत्+हिमम्॥35॥
दधिमण्डसुरामण्डधात्रीफलरसैः पृथक्।
सौवीरकेण वा युक्तं कल्केन त्रैवृतेन वा॥36॥
दन्तीकषाये तत्+मज्ज्ञः+ गुडं जीर्णं च निक्षिपेत्।
तम्+अरिष्टिं स्थितं मासं पाययेत् पक्षम्+एव वा॥37॥
त्वचं तिल्वकमूलस्य त्यक्त्वा+आभ्यन्तरवल्कलम्।
विशोष्य चूर्णयित्वा च द्वौ भागौ गालयेत्+ततः॥38॥
रोध्रस्य+एव कषायेण तृतीयं तेन भावयेत्।
कषाये दशमूलस्य तं भागं भावितं पुनः॥39॥
शुष्कं चूर्णं पुनः कृत्वा ततः पाणितलं पिबेत्।
मस्तुमूत्रसुरामण्डकोलधात्रीफलम्बुभिः॥40॥
तिल्वकस्य कषायेण कल्केन च सशर्करः।
सघृतः साधितः+ लेहः सः+ च श्रेष्ठं विरेचनम्॥41॥
सुधा भिनत्ति दोषाणां महान्तम्+अपि सञ्चयम्।
आशु+एव कष्टविभ्रंशात्+न+एव तां कल्पयेत्+अतः॥42॥
मृदौ कोष्ठे+अबले बाले स्थविरे दीर्घरोगिणि।
कल्प्या गुल्मोदरगरत्वग्रोगमधुमेहिषु॥43॥
पाण्डौ दूषीविषे शोफे दोषविभ्रान्तचेतसि।
सा श्रेष्ठा कण्टकैः+तीक्ष्णैः+बहुभिः+च समाचिता॥44॥
द्विवर्षां वा त्रिवर्षां वा शिशिरान्ते विशेषतः।

तां पाटयित्वा शस्त्रेण क्षीरम्+उद्धारयेत्+ततः॥45॥
बिल्वादीनां बहुत्योः+वा क्वाथेन समम्+एकशः।
मिश्रयित्वा सुधाक्षीरं ततः+अङ्गारेषु शोषयेत्॥46॥
पिबेत्+कृत्वा तु गुटिकां मस्तुमूत्रसुरादिभिः।
त्रिवृतादीन्+नव वरां स्वर्णक्षीरीं ससातलाम्॥47॥
सप्ताहं स्नुक्पयः पीतान् रसेन+आज्येन वा पिबेत्।
तद्वद्व्योषोत्तमाकुम्भनिकुम्भाग्नीन् गुडाम्बुना॥48॥
न+अतिशुष्कं फलं ग्राह्यं शङ्खिन्या निस्तुषीकृतम्।
सप्तलायाः+तथा मूलं ते तु तीक्ष्णविकाषिणी॥49॥
श्लेष्मामयोदरगरश्वयथ्वादिषु कल्पयेत्।
अक्षमात्रं तयोः पिण्डं मदिरालवणान्वितम्॥50॥
हृद्रोगे वातकफजे तद्वद्गुल्मे+अपि योजयेत्।
दन्तिदन्मतस्थिरं स्थूलं मूलं दन्तीद्रवन्तिजम्॥51॥
आताम्रश्यावतीक्ष्णोष्णम्+आशुकारि विकाशि च।
गुरुः+ प्रकोपि वातस्य पित्तश्लेष्मविलायनम्॥ 52॥
तत्+क्षौद्रपिप्पलीलिप्तं स्वेद्यं मृद्दर्भवेष्ठितम्।
शोष्यं मन्दातपे+अग्न्यर्कौ हतः+ हि+अस्य विकाशिताम्॥53॥
तत्+पिबेत्+मस्तुमदिरातक्रपीलुरसासवैः।
अभिष्यण्णतनुः+गुल्मी प्रमेही जठरी गरी॥54॥
गोमृगाजरसैः पाण्डुः कृमिकोष्ठी भगन्दरी।
सिद्धं तत्+क्वाथकल्काभ्यां दशमूलरसेन च॥55॥
विसर्पविद्रध्यलजीकक्षादाहान् जयेत्+हृतम्।
तैलं तु गुल्ममेहार्शोविबन्धकफमारुतान्॥56॥
महास्नेहः शकृत्+शुक्रवातसङ्गानिलव्यथाः।
विरेचने मुख्यतमा नव+एते त्रिवृतादयः॥57॥
हरीतकीम्+अपि त्रिवृद्विधानेन+उपकल्पयेत्।
गुडस्याष्टपले पथ्याविंशतिः स्यात्+पलं पलम्॥58॥
दन्तीचित्रकयोः कर्षौ पिप्पलीत्रिवृतोः+दश।
प्रकल्प्य मोदकान्+एकं दशमे दशमे+अहनि॥59॥
उष्णाम्भः+अनुपिबेत्+खादेत्+तान् सर्वान्विधिना+अमुना।
एते निष्परीहाराः स्युः सर्वव्याधिनिबर्हणाः॥60॥
विशेषाद्ग्रहणीपाण्डुकण्डूकोठार्शसां हिताः।

अल्पस्य+अपि महार्थत्वं प्रभूतस्याल्पकर्मताम्॥61॥

कुर्यात्+संश्लेषविश्लेषकालसंस्कारयुक्तिभिः॥ 61 1/2॥

त्वक्केसराम्रातकदाडिमैलासितोपलामाक्षिकमातुलुङ्गैः।

मद्येन तैः+तैः+च मनोनुकूलैः+युक्तानि देयानि विरेचनानि॥62॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां पञ्चमे कल्पसिद्धिस्थाने विरेचनकल्पः+ नाम द्वितीयः+अध्यायाः॥2॥

तृतीयः+अध्यायाः।

अथ+अतः+ वमनविरेचनव्यापत्सिद्धिं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

वमनं मृदुकोष्ठेन क्षुद्वता+अल्पकफेन वा।

अतितीक्ष्णहिमस्तोकमजीर्णे दुर्बलेन वा॥1॥

पीतं प्रयाति+अधः+तस्मिन्+निष्टहानिः+मलोदयः।

वामयेत्+तं पुनः स्निग्धं स्मरन् पूर्वम्+अतिक्रमम्॥2॥

अजीर्णिनः श्लेष्मवतः+ व्रजति+ऊर्ध्वं विरेचनम्।

अतितीक्ष्णोष्णलवणम्+अहृद्यम्+अतिभूरि वा॥3॥

तत्र पूर्वोदिता व्यापत्सिद्धिः+च, न तथा+अपि चेत्।

आशये तिष्ठति ततः+तृतीयं न+अवचारयेत्॥4॥

अन्यत्र सात्म्यात्+हृद्यात्+वा भेषजात्+निरपायतः।

अस्निग्धस्विन्नदेहस्य पुराणं रूक्षम्+औषधम्॥5॥

दोषान्+उत्क्लेश्य निर्हर्तुम्+अशक्तं जनयेत्+गदान्।

विभ्रंशं श्वयथुं हिध्मां तमसः+ दर्शनं तृषम्॥6॥

पिण्डीकोद्वेष्टनं कण्डूमूर्वोः सादं विवर्णताम्।

स्निग्धस्विन्नस्य वा+अत्यल्पं दीप्ताग्नेः+जीर्णम्+औषधम्॥7॥

शीतैः+वा स्तब्धम्+आमे वा समुत्क्लेश्याहरन्मलान्।

तान्+एव जनयेत्+रोगान्+अयोगः सर्वः+ एव सः॥8॥

तं तैललवणाभ्यक्तं स्विन्नं प्रस्तरसङ्करैः।

निरूढं जाङ्गलरसैः+भोजयित्वा+अनुवासयेत्॥9॥

फलमागधिकादारुसिद्धतैलेन मात्रया।

स्निग्धं वातहरैः स्नेहैः पुनः+तीक्ष्णेन शोधयेत्॥10॥

बहुदोषस्य रूक्षस्य मन्दाग्नेः+अल्पम्+औषधम्।

सोदावर्तस्य च+उत्क्लेश्य दोषाने मार्गान् निरुध्य तैः॥11॥

भृशम्+आध्मापयेत्+नाभिं पृष्ठपार्श्वशिरोरुजम्।

श्वासं विण्मूत्रवातानां सङ्गं कुर्यात्+च दारुणम्॥12॥
अभ्यङ्गस्वेदवर्त्यादि सनिरूहानुवासनम्।
उदावर्तहरं सर्वं कर्माध्मातस्य शस्यते॥13॥
पञ्चमूलयवक्षारवचाभूतिकसैन्धवैः।
यवागूः सुकृता शूलविबन्धानाहनाशनी॥14॥
पिप्पलीदाडिमक्षारहिङ्गुशुण्ठ्यम्लवेतसान्।
ससैन्धवान् पिबेत्+मद्यैः सर्पिषोष्णोदकेन वा॥15॥
प्रवाहिकापरिस्रावजवेदनापरिकर्तने।
पीतौषधस्य वेगानां निग्रहात्+मारुतादयः॥16॥
कुपिता हृदयं गत्वा घोरं कुर्वन्ति हृद्ग्रहम्।
हिध्मापार्श्वरुजाकासदैन्यलालाक्षिविभ्रमैः॥17॥
जिह्वां खादति निःसंज्ञः+ दन्तान् कटकटाययन्।
न गच्छेत्+विभ्रमं तत्र वामयेत्+आशु तं भिषक्॥18॥
मधुरैः पित्तमूर्च्छार्तं कटुभिः कफमूर्च्छितम्।
पाचनीयैः+ततः+च+अस्य दोषशेषं विपाचयेत्॥19॥
कायाग्निं च बलं च+अस्य क्रमेण+अभिप्रवर्धयेत्।
पवनेन+अतिवमतः+ हृदयं यस्य पीड्यते॥20॥
तस्मै स्निग्धाम्ललवणान् दद्यात्+पित्तकफे+अन्यथा।
पीतौषधस्य वेगानां निग्रहेण कफेन वा॥21॥
रुद्धः+अति वा विशुद्धस्य गृह्णाति+अङ्गानि मारुतः।
स्तम्भवेपथुनिस्तोदसादोद्वेष्टार्तिभेदनैः॥22॥
तत्र वातहरं सर्वं स्नेहस्वेदादि शस्यते।
बहुतीक्ष्णं क्षुधार्तस्य मृदुकोष्ठस्य भेषजम्॥23॥
हृत्वा+आशु विट्पित्तकफान् धातून्+आस्रावयेत्+द्रवान्।
तत्र+अतियोगे मधुरैः शेषम्+औषधम्+उल्लिखेत्॥24॥
योज्यः+अति वमने रेकः+ विरेके वमनं मृदु।
परिषेकावगाहाद्यैः सुशीतैः स्तम्भयेत्+च तम्॥25॥
अञ्जनं चन्दनोशीरम्+अजासृक्शर्करोदकम्।
लाजचूर्णैः पिबेत्+मन्थम्+अतियोगहरं परम्॥26॥
वमनस्य+अतियोगे तु शीताम्बुपरिषेचितः।
पिबेत्+फलरसैः+मन्थं सघृतक्षौद्रशर्करम्॥27॥
सोद्गारायां भृशं छर्द्यां मूर्वाया धान्यमुस्तयोः।

समधूकाञ्जनं चूर्णं लेहयेत्+मधुसंयुतम्॥28॥
वमतः+अन्तः प्रविष्टायां जिह्वायां कवलग्रहाः।
स्निग्धाम्ललवणा हृद्या यूषमांसरसा हिताः॥29॥
फलानि+अम्लानि खादेयुः+तस्य च+अन्ये+अग्रतः+ नराः।
निःसृतां तु तिलद्राक्षाकल्कलिप्तां प्रवेशयेत्॥30॥
वाग्ग्रहानिलरोगेषु घृतमांसोपसाधिताम्।
यवागूं तनुकां दद्यात्+स्नेहस्वेदौ च कालवित्॥31॥
अतियोगात्+च भैषज्यं जीवं हरति शोणितम्।
तत्+जीवादानम्+इत्युक्तम्+आदत्ते जीवितं यतः॥32॥
शुने काकाय वा दद्यात्+तेन+अन्नम्+असृजा सह।
भुक्ते+अभुक्ते वदेत्+जीवं पित्तं वा भेषजेरितम्॥33॥
शुक्लं वा भावितं वस्त्रम्+आवानं कोष्णवारिणा।
प्रक्षालितं विवर्णं स्यात्+पित्ते शुद्धं तु शोणिते॥34॥
तृष्णामूर्च्छामदार्तस्य कुर्यात्+आमरणात्+क्रियाम्।
रक्तपित्तातिसारघ्नीं तस्य+आशु प्राणरक्षणीम्॥35॥
मृगगोमहिषाजानां सद्यस्कं जीवताम्+असृक्।
पिबेत्+जीवाभिसन्धानं जीवं तत्+हि+आशु गच्छति॥36॥
तत्+एव दर्भम्+ऋदितं रक्तं बस्तौ निषेचयेत्।
श्यामाकाश्मर्यमधुकदूर्वोशीरैः शृतं पयः॥37॥
घृतमण्डाञ्जनयुतं बस्तिं वा योजयेत्+हिमम्।
पिच्छाबस्तिं सुशीतं वा घृतमण्डानुवासनम्॥38॥
गुदं भ्रष्टं कषायैः+च स्तम्भयित्वा प्रवेशयेत्।
विसंज्ञं श्रावयेत्+सामवेणुगीतादिनिस्वनम्॥39॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंतायां पञ्चमे कल्पसिद्धिस्थाने
वमनविरेचनव्यापत्सिद्धिः+नाम तृतीयः+अध्यायः॥3॥
चतुर्थः+अध्यायः।
अथ+अतः+ बस्तिकल्पं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः॥
बलां गुडूचीं त्रिफलां सरास्नां द्विपञ्चमूलं च पलोन्मितानि।
अष्टौ फलानि+अर्धतुलां च मांसात्+छागात्+पचेत्+अप्सु चतुर्थशेषम्॥1॥
पूतः+ यवानीफलबिल्वकुष्ठवचाशताह्वाघनपिप्पलीनाम्।
कल्कैः+गुडक्षौद्रघृतैः सतैलैः+युक्तः सुखोष्णः+ लवणान्वितः+च॥2॥

बस्तिः परं सर्वगदप्रमाथी स्वस्थे हितः+ जीवनबृंहणः+च
बस्तौ च यस्मिन् पठितः+ न कल्कः सर्वत्र दद्यात्+अमुम्+एव तत्र॥3॥
द्विपञ्चमूलस्य रसः+अम्लयुक्तः सच्छागमांसस्य सपूर्वपेष्यः।
त्रिस्नेहयुक्तः प्रवरः+ निरूहः सर्वानिलव्याधिहरः प्रदिष्टः॥4॥
बलापटोलीलघुपञ्चमूलत्रायन्तिकैः+अण्डयवात्+सुसिद्धात्।
प्रस्थः+ रसाच्छागरसार्धयुक्तः साध्यः पुनः प्रस्थसमः सः+ यावत्॥5॥
प्रियङ्गुकृष्णाघनकल्कयुक्तः सतैलसर्पिः+मधुसैन्धवः+च।
स्यात्+दीपनः+ मांसबलप्रदः+च चक्षुः+बलं च+उपदधाति सद्यः॥6॥
एरण्डमूलात्+त्रिपलं पलाशात्+तथा पलांशं लघुपञ्चमूलम्।
रास्नाबलाछिन्नरुहाश्वगन्धापुनर्नवारग्वधदेवदारु॥7॥
फलानि च+अष्टौ सलिलाढकाभ्यां विपाचयेदष्टमशेषिते+अस्मिन्।
वचाशताह्वाहपुषाप्रियङ्गुयष्टीकणावत्सकबीजमुस्तम्॥8॥
दद्यात्+सुपिष्टं सहतार्क्ष्यशैलम्+अक्षप्रमाणं लवणांशयुक्तम्।
समाक्षिकः+तैलयुतः समूत्रो बस्तिः+जयेत्+लेखनदीपनः+असौ॥9॥
जङ्घोरुपादत्रिकपृष्ठकोष्ठहृद्गुह्यशूलं गुरुतां विबन्धम्।
गुल्माश्मवर्ध्मग्रहणीगुदोत्थान्+ताः+तान्+च रोगान् कफवातजातान्॥10॥
यष्ट्याह्वरोध्राभयचन्दनैः+च शृतं पयः+अग्र्यं कमलोत्पलैः+च।
सशर्कराक्षौद्रघृतं सुशीतं पित्तामयान् हन्ति सजीवनीयम्॥11॥
रास्नां वृषं लोहितिकाम्+अनन्तां बलां कनीयः+तृणपञ्चमूल्यौ।
गोपाङ्गनाचन्दनपद्मकर्द्धियष्ट्याह्वरोध्राणि पलार्धकानि॥12॥
निःक्वाथ्यं तोयेन रसेन तेन शृतं पयः+अर्धाढकमम्बुहीनम्।
जीवन्तिमेदर्द्धिवरीविदारीवीराद्विकाकोलिकसेरुकाभिः॥13॥
सितोपलाजीवकपद्मरेणुप्रपौण्डरीकोत्पलपुण्डरीकैः।
रोध्रात्मगुप्तामधुयष्टिकाभिर्नागाह्वमुञ्जातकचन्दनैः+च॥14॥
पिष्टैः+घृतक्षौद्रयुतैः+निरूहं ससैन्धवं शीतलम्+एव दद्यात्।
प्रत्यागते धन्वरसेन शालीन् क्षीरेण वा+अद्यात्+परिषिक्तगात्रः॥15॥
दाहातिसारप्रदरास्रपित्तहृत्पाण्डुरोगान् विषमज्वरं च।
सगुल्ममूत्रग्रहकामलादीन् सर्वामयान् पित्तकृतान्+निहन्ति॥16॥
कोशातकारग्वधदेवदारुमूर्वाश्वदंष्ट्राकुटजार्कपाठाः।
पक्त्वा कुलत्थान् बृहतीं च तोये रसस्य तस्य प्रसृता दश स्युः॥17॥
तान् सर्षपैलामदनैः सकुष्ठैः+अक्षप्रमाणैः प्रसृतैः+च युक्तान्।
क्षौद्रस्य तैलस्य फलाह्वयस्य क्षारस्य तैलस्य च सार्षपस्य॥18॥

दद्यात्+निरूहं कफरोगिताय मन्दाग्नये च+अशनविद्विषे च।
वक्ष्ये मृदून् स्नेहकृतः+ निरूहान् सुखोचितानां प्रसृतैः पृथक् तु॥19॥
अथ+इमान् सुकुमाराणां निरूहान् स्नेहनान् मृदून्।
कर्मणा विप्लुतानां च वक्ष्यामि प्रसृतैः पृथक्॥20॥
क्षीराद् द्वौ प्रसृतौ कार्यौ मधुतैलघृतात्+त्रयः।
खजेन मथितः+ बस्तिः+वातघ्नः+ बलवर्णकृत्॥21॥
एकैकः प्रसृतः+तैलप्रसन्नाक्षौद्रसर्पिषाम्।
बिल्वादिमूलक्वाथात्+द्वौ कौलत्थात्+द्वौ सः+ वातजित्॥22॥
पटोलनिम्बभूतीकरास्नासप्तच्छदाम्भसः।
प्रसृतः पृथक्+आज्यात्+च बस्तिः सर्षपकल्कवान्॥23॥
स पञ्चतिक्तः+अभिष्यन्दकृमिकुष्ठप्रमेहहा।
चत्वारः+तैलगोमूत्रदधिमण्डाम्लकाञ्जिकात्॥24॥
प्रसृताः सर्षपैः पिष्टैः+विट्सङ्गानाहभेदनः।
पयस्येक्षुस्थिरारास्नाविदारीक्षौद्रसर्पिषाम्॥25॥
एकैकः प्रसृतः+ बस्तिः कृष्णाकल्कः+ वृषत्वकृत्।
सिद्धबस्तीन्+अतः+ वक्ष्ये सर्वदा यान् प्रयोजयेत्॥26॥
निर्व्यापदः+ बहुफलान् बलपुष्टिकरान् सुखान्।
मधुतैले समे कर्षः सैन्धवात्+द्विपिचुर्मिसिः॥27॥
एरण्डमूलक्वाथेन निरूहः+ माधुतैलिकः।
रसायनं प्रमेहार्शःकृमिगुल्मान्त्रवृद्धिनुत्॥28॥
सयष्टिमधुकः+च+एष चक्षुष्यः+ रक्तपित्तजित्।
यापनः+ घनकल्केन मधुतैलरसाज्यवान्॥29॥
पायुजानूरुवृषणबस्तिमेहनशूलजित्।
प्रसृतांशैः+घृतक्षौद्रवसातैलैः प्रकल्पयेत्॥30॥
यापनं सैन्धवार्धाक्षहपुषार्धपलान्वितम्।
एरण्डमूलनिःक्वाथः+ मधुतैलं ससैन्धवम्॥31॥
एष युक्तरथः+ बस्तिः सवचापिप्पलीफलः।
स क्वाथः+ मधुषड्ग्रन्थाशताह्वाहिङ्गुसैन्धवम्॥31॥
सुरदारु च रास्ना च बस्तिः+दोषहरः शिवः।
पञ्चमूलस्य निःक्वाथः+तैलं मागधिका मधु॥33॥
ससैन्धवः समधुकः सिद्धबस्तिः+इति स्मृतः।
द्विपञ्चमूलत्रिफलाफलबिल्वानि पाचयेत्॥34॥

गोमूत्रे, तेन पिष्टैः+च पाठावत्सकतोयदैः।
सफलैः क्षौद्रतैलाभ्यां क्षारेण लवणेन च॥35॥
युक्तः+ बस्तिः कफव्याधिपाण्डुरोगविषूचिषु।
शुक्रानिलविबन्धेषु बस्त्याटोपे च पूजितः॥36॥
मुस्तापाठामृतैः+अण्डबलारास्नापुनर्नवाः।
मञ्जिष्ठारग्वधोशीरत्रायमाणाक्षरोहिणीः॥37॥
कनीयः पञ्चमूलं च पालिकं, मदनाष्टकम्।
जलाढके पचेत्+तत्+च पादशेषं परिस्रुतम्॥38॥
क्षीरद्विप्रस्थसंयुक्तं क्षीरशेषं पुनः पचेत्।
सपादजाङ्गलरसः ससर्पिः+मधुसैन्धवः॥39॥
पिष्टैः+यष्टिमिसिश्यामाकलिङ्गकरसाञ्जनैः।
बस्तिः सुखोष्णः+ मांसाग्निबलशुक्रविवर्द्धनः॥40॥
वातासृङ्मोहमेहार्शोगुल्मविण्मूत्रसङ्ग्रहान्।
विषमज्वरवीसर्पवर्ध्माध्मानप्रवाहिकाः॥41॥
वङ्क्षणोरुकटीकुक्षिमन्याश्रोत्रशिरोरुजः।
हन्यात्+असृग्दरोन्+मादशोफकासाश्मकुण्डलान्॥42॥
चक्षुष्यः पुत्रदः+ राजा यापनानां रसायनम्।
मृगाणां लघुवद्राणां दशमूलस्य च+अम्भसा॥43॥
हपुषामिसिगाङ्गेयीकल्कैः+वातहरः परम्।
निरूहः+अत्यर्थवृष्यः+च महास्नेहसमन्वितः॥44॥
मयूरं पक्षपित्तान्त्रपादविट्तुण्डवर्जितम्।
लघुना पञ्चमूलेन पालिकेन समन्वितम्॥45॥
पक्त्वा क्षीरजले क्षीरशेषं सघृतमाक्षिकम्।
तत्+विदारीकणायष्टिशताह्वाफलकल्कवत्॥46॥
बस्तिः+ईषत्+पटुयुतः परमं बलशुक्रकृत्।
कल्पना+इयं पृथक् कार्या तित्तिरिप्रभृतिषु+अपि॥47॥
विष्किरेषु समस्तेषु प्रतुदप्रसहेषु च।
जलचारिषु तद्वत्+च मत्स्येषु क्षीरवर्जिता॥48॥
गोधानकुलमार्जारशल्यकोन्दुरजं पलम्।
पृथक् दशपलं क्षीरे पञ्चमूलं च साधयेत्॥49॥
तत्+पयः फलवैदेहीकल्कद्विलवणान्वितम्।
ससितातैलमध्वाज्यः+ बस्तिः+योज्यः+ रसायनम्॥50॥

व्यायाममथितोरस्कक्षीणेन्द्रियबलौजसाम्।
विबद्धशुक्रविण्मूत्रखुडवातविकारिणाम्॥51॥
गजवाजिरथक्षोभभग्नजर्जरितात्मनाम्।
पुनर्नवत्वं कुरुते वाजीकरणम्+उत्तमम्॥52॥
सिद्धेन पयसा भोज्यम्+आत्मगुप्तोच्चटेक्षुरैः।
स्नेहान्+च+अयन्त्रणान् सिद्धान् सिद्धद्रव्यैः प्रकल्पयेत्॥53॥
दोषघ्नाः सपरीहारा वक्ष्यन्ते स्नेहबस्तयः।
दशमूलं बलां रास्नाम्+अश्वगन्धां पुनर्नवाम्॥54॥
गुडूच्यैः+अण्डभूतीकभार्गीवृषकरोहिषम्।
शतावरीं सहचरं काकनासां पलांशकम्॥55॥
यवमाषातसीकोलकुलत्थान् प्रसृतोन्मितान्।
वहे विपाच्य तोयस्य द्रोणशेषेण तेन च॥56॥
पचेत्+तैलाढकं पेष्यैः+जीवनीयैः पलोन्मितैः।
अनुवासनम्+इति+एतत्+सर्ववातविकारनुत्॥57॥
आनूपानां वसा तद्वत्+जीवनीयोपसाधिता।
शताह्वाचिरिबिल्वाम्लैः+तैलं सिद्धं समीरणे॥58॥
सैन्धवेन+अग्निवर्णेन तप्तं च+अनिलजित्+ घृतम्।
जीवन्तीं मदनं मेदां श्रावणीं मधुकं बलाम्॥59॥
शताह्वर्षभकौ कृष्णां काकनासां शतावरीम्।
स्वगुप्तां क्षीरकाकोलीं कर्कटाख्यां शठीं वचाम्॥60॥
पिष्ट्वा तैलघृतं क्षीरे साधयेत्+तत्+चतुर्गुणे।
बृंहणं वातपित्तघ्नं बलशुक्राग्निवर्धनम्॥61॥
रजःशुक्रामयहरं पुत्रीयं च+अनुवासनम्।
सैन्धवं मदनं कुष्ठं शताह्वा निचुलः+ वचा॥62॥
ह्रीबेरं मधुकं भार्गी देवदारु सकट्फलम्।
नागरं पुष्करं मेदा चविका चित्रकः शठी॥63॥
विडङ्गातिविषे श्यामा हरेणुः+नीलिनी स्थिरा।
बिल्वाजमोदचपला दन्ती रास्ना च तैः समैः॥64॥
साध्यम्+एरण्डतैलं वा तैलं वा कफरोगनुत्।
वर्ध्मोदावर्तगुल्मार्शःप्लीहमेहाढ्यमारुतान्॥65॥
आनाहम्+अश्मरीं च+आशु हन्त्यात्+तत्+अनुवासनम्।
साधितं पञ्चमूलेन तैलं बिल्वादिना+अथवा॥66॥

कफघ्नं कल्पयेत्+तैलं द्रव्यैः+वा कफघातिभिः।
फलैः+अष्टगुणैः+च+अम्लैः सिद्धम्+अन्वासनं कफे॥67॥
मृदुवस्तिजडीभूते तीक्ष्णः+अन्यः+ बस्तिः+इष्यते।
तीक्ष्णैः+विकर्षिते स्निग्धः+ मधुरः शिशिरः+ मृदुः॥68॥
तीक्ष्णत्वं मूत्रपील्वग्निलवणक्षारसर्षपैः।
प्राप्तकालं विधातव्यं क्षीराज्याद्यैः+तु मार्दवम्॥69॥
बलकालरोगदोषप्रकृतीः प्रविभज्य योजितः+ बस्तिः।
स्वैः स्वैः+औषधवर्गैः स्वान् स्वान् रोगान्+निवर्तयति॥70॥
उष्णार्तानां शीताञ्छीतार्तानां तथा सुखोष्णान्+च।
तत्+योग्यौषधयुक्तान् बस्तीन् संतर्क्य युञ्जीत॥71॥
बस्तीं+न बृंहणीयान् दद्यात्+व्याधिषु विशोधनीयेषु।
मेदस्विनः+ विशोध्या ये च नराः कुष्ठमेहार्ताः ॥72॥
न क्षीणक्षतदुर्बलमूर्च्छितकृशशुष्कशुद्धदेहानाम्।
दद्यात्+विशोधनीयान् दोषनिबद्धायुषः+ ये च॥73॥
इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां पञ्चमे कल्पसिद्धिस्थाने बस्तिकल्पः+ नाम चतुर्थः+अध्ययाः॥4॥
पञ्चमः+अध्यायः।
अथ+अतः+ बस्तिव्यापत्सिद्धिं व्याख्यास्यामः।
इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।
अस्निग्धस्विन्नदेहस्य गुरुकोष्ठस्य योजितः।
शीतः+अल्पस्नेहलवणद्रव्यमात्रः+ घनः+अपि वा॥1॥
बस्तिः सङ्क्षोभ्य तं दोषं दुर्बलत्वात्+अनिर्हरन्।
करोति+अयोगं तेन स्यात्+वातमूत्रशकृद्ग्रहः॥2॥
नाभिवस्तिरुजा दाहः+ हृल्लेपः श्वयथुः+गुदे।
कण्डूः+गण्डानि वैवर्ण्यम्+अरतिः+वह्निमार्दवम्॥3॥
क्वाथद्वयं प्राग्विहितं मध्यदोषे+अतिसारिणि।
उष्णस्य तस्मात्+एकस्य तत्र पानं प्रशस्यते॥4॥
फलवर्त्यः+तथा स्वेदाः कालं ज्ञात्वा विरेचनम्।
बिल्वमूलत्रिवृद्दारुयवकोलकुलत्थवान्॥5॥
सुरादिमूत्रवान् बस्तिः सप्राक्पेष्यस्तम्+आनयेत्।
युक्तः+अल्पवीर्यः+ दोषाढ्ये रुक्षे क्रूराशये+अथवा॥6॥
बस्तिः+दोषावृतः+ रुद्धमार्गः+ रुन्ध्यात्+समीरणम्।

स विमार्गः+अनिलः कुर्यात्+आध्मानं मर्मपीडनम्॥7॥
विदाहं गुदकोष्ठस्य मुष्कवङ्क्षणवेदनाम्।
रुणद्धि हृदयं शूलैः+इतः+चेतः+च धावति॥8॥
स्वभ्यक्तस्विन्नगात्रस्य तत्र वर्तिं प्रयोजयेत्।
बिल्वादिः+च निरूहः स्यात्+पीलुसर्षपमूत्रवान्॥9॥
सरलामरदारुभ्यां साधितं च+अनुवासनम्।
कुर्वतः+ वेगसंरोध पीडितः+ वा+अतिमात्रया॥10॥
अस्निग्धलवणोष्णः+ वा बस्तिः+अल्पः+अल्पभेषजः।
मृदुः+वा मारुतेन+ऊर्ध्वं विक्षिप्तः+ मुखनासिकात्॥11॥
निरेति मूर्च्छाहृल्लासतृड्दाहादीन् प्रवर्तयन्।
मूर्च्छाविकारं दृष्ट्वा+अस्य सिञ्चेत्+शीताम्बुना मुखम्॥12॥
व्यजेत्+आक्लमनाशात्+च प्राणायामं च कारयेत्।
पृष्ठपार्श्वोदरं मृज्यात् करैरुष्णैः+अधोमुखम्॥13॥
केशेषु+उत्क्षिप्य धुन्वीत भीषयेत्+व्यालदंष्ट्रिभिः।
शस्त्रोल्काराजपुरुषैः+बस्तिः+एति तथा ह्यधः॥14॥
पाणिवस्त्रैः+गलापीडं कुर्यात्+न म्रियते तथा।
प्राणोदाननिरोधात्+हि सुप्रसिद्धतरायनः॥15॥
अपानः पवनः+ बस्तिं तमाश्वेवापकर्षति।
कुष्ठक्रमुककल्कं च पाययेत्+आम्लसंयुतम्॥16॥
औष्ण्यात्+तैक्ष्ण्यात्+सरत्वात्+च बस्तिं सः+अस्य+अनुलोमयेत्।
गोमूत्रेण त्रिवृत्पथ्याकल्कं वा+अधोनुलोमनम्॥17॥
पक्वाशयस्थिते स्विन्ने निरूहः+ दाशमूलिकः।
यवकोलकुलत्थैः+च विधेयः+ मूत्रसाधितैः॥18॥
बस्तिः+गोमूत्रसिद्धैः+वा सामृतावंशपल्लवैः।
पूतीकरञ्जत्वक्पत्रशठीदेवाह्वरोहिषैः॥19॥
सतैलगुडसिन्धूत्थः+ विरेकौषधकल्कवान्।
बिल्वादिपञ्चमूलेन सिद्धः+ बस्तिः+उरःस्थिते॥20॥
शिरःस्थे नावनं धूमः प्रच्छाद्यं सर्षपैः शिरः।
बस्तिः+अत्युष्णतीक्ष्णाम्लघनः+अतिस्वेदितस्य वा॥21॥
अल्पे दोषे मृदौ कोष्ठे प्रयुक्तः+ वा पुनःपुनः।
अतियोगत्वम्+आपन्नः+ भवेत्+कुक्षिरुजाकरः॥22॥
विरेचनातियोगेन सः+ तुल्याकृतिसाधनः।

बस्तिः क्षाराम्लतीक्ष्णोष्णलवणः पैत्तिकस्य वा॥23॥
गुदं दहन् लिखन् क्षिण्वन् करोति+अस्य परिस्रवम्।
स विदग्धं स्रवति+अस्रं वर्णैः पित्तं च भूरिभिः॥24॥
बहुशः+च+अतिवेगेन मोहं गच्छति सः+असकृत्।
रक्तपित्तातिसारघ्नी क्रिया तत्र प्रशस्यते॥25॥
दाहादिषु त्रिवृत्+कल्कं मृद्वीकावारिणा पिबेत्।
तत्+हि पित्तशकृत्+वातान् हृत्वा दाहादिकान् जयेत्॥26॥
विशुद्धः+च पिबेत्+शीतां यवागूं शर्करायुताम्।
युञ्ज्यात्+वा+अतिविरिक्तस्य क्षीणविट्कस्य भोजनम्॥27॥
माषयूषेण कुल्माषान् पानं दधिः+अथवा सुराम्।
सिद्धिः+बस्त्यापदाम्+एवं स्नेहबस्तेः+तु वक्ष्यते॥28॥
शीतः+अल्पः+ वा+अधिके वाते पित्ते+अत्युष्णः कफे मृदुः।
अतिभुक्ते गुरुः+वर्चः सञ्चये+अल्पबलः+तथा॥29॥
दत्तः+तैः+आवृतः स्नेहः+ न+आयाति+अभिभवात्+अपि।
स्तम्भोरुसदनाध्मानज्वरशूलाङ्गमर्दनैः॥30॥
पार्श्वरुग्वेष्टनैः+विद्यात्+वायुना स्नेहम्+आवृतम्।
स्निग्धाम्ललवणोष्णैः+तं रास्नापीतद्रुतैलिकैः॥31॥
सौवीरकसुराकोलकुलत्थयवसाधितैः।
निरूहैः+निर्हरेत्+सम्यक् समूत्रैः पञ्चमूलिकैः॥32॥
ताभ्याम्+एव च तैलाभ्यां सायं भुक्ते+अनुवासयेत्।
तृड्दाहरागसम्मोहवैवर्ण्यतमकज्वरैः॥33॥
विद्यात्+पित्तावृतं स्वादुतिक्तैः+तं बस्तिभिः+हरेत्।
तन्द्राशीतज्वरालस्यप्रसेकारुचिगौरवैः॥34॥
सम्मूर्च्छाग्लानिभिः+विद्यात्+श्लेष्मणा स्नेहम्+आवृतम्।
कषायतिक्तकटुकैः सुरामूत्रोपसाधितैः॥35॥
फलतैलयुतैः साम्लैः+बस्तिभिः+तं विनिर्हरेत्।
छर्दिमूर्च्छारुचिग्लानिशूलनिद्राङ्गमर्दनैः॥36॥
आमलिङ्गैः सदाहैः+तं विद्यात्+अत्यशनावृतम्।
कटूनां लवणानां च क्वाथैः+चूर्णैः+च पाचनम्॥37॥
मृदुः+विरेकः सर्वं च तत्र+आमविहितं हितम्।
विण्मूत्रानिलसङ्गार्तिगुरुत्वाध्मानहृद्ग्रहैः॥38॥
स्नेहं विडावृतं ज्ञात्वा स्नेहस्वेदैः सवर्तिभिः।

श्यामाबिल्वादिसिद्धैः+च निरूहैः सानुवासनैः॥39॥
निर्हरेत्+विधिना सम्यक्+उदावर्तहरेण च।
अभुक्ते शूनपायौ वा पेयामात्राशितस्य वा॥40॥
गुदे प्रणिहितः स्नेहः+ वेगात्+धावति+अनावृतः।
ऊर्ध्वं कायं ततः कण्ठात्+ऊर्ध्वेभ्यः खेभ्यः+ एति+अपि॥41॥
मूत्रश्यामात्रिवृत्सिद्धः+ यवकोलकुलत्थवान्।
तत्+सिद्धतैलः+ देयः स्यत्+निरूहः सानुवासनः॥42॥
कण्ठात्+आगच्छतः स्तम्भकण्ठग्रहविरेचनैः।
छर्दिघ्नीभिः क्रियाभिः+च तस्य कुर्यात्+निबर्हणम्॥43॥
नापक्वं प्रणयेत्+स्नेहं गुदं सः+ हि+उपलिम्पति।
ततः कुर्यात्+सरुड्मोहकण्डूशोफान्, क्रिया+अत्र च॥44॥
तीक्ष्णः+ बस्तिः+तथा तैलम्+अर्कपत्ररसे शृतम्।
अनुच्छ्वास्य तु बद्धे वा दत्ते निःशेषः+ एव वा॥45॥
प्रविश्य क्षुभितः+ वायुः शूलतोदकरः+ भवेत्।
तत्र+अभ्यङ्गः+ गुदे स्वेदः+ वातघ्नानि+अशनानि च॥46॥
द्रुतं प्रणीते निष्कृष्टे सहसा+उत्क्षिप्तः+ एव वा।
स्यात् कटीगुदजङ्घोरुबस्तिस्तम्भार्तिभेदनम्॥47॥
भोजनं तत्र वातघ्नं स्वेदाभ्यङ्गाः सबस्तयः।
पीड्यमाने+अन्तरा मुक्ते गुदे प्रतिहतः+अनिलः॥48॥
उरःशिरोरुजं सादमूर्वोः+च जनयेत्+बली।
बस्तिः स्यात्+तत्र बिल्वादिफलश्यामादिमूत्रवान्॥49॥
अतिप्रपीडितः कोष्ठे तिष्ठति+आयाति वा गलम्।
तत्र बस्तिः+विरेकः+च गलपीडादि कर्म च॥50॥
वमनाद्यैः+विशुद्धं च क्षामदेहबलानलम्।
यथा+अण्डं तरुणं पूर्णं तैलपात्रं यथा तथा॥51॥
भिषक् प्रयत्नतः+ रक्षेत्+सर्वस्मात्+अपचारतः।
दद्यात्+मधुरहृद्यानि ततः+अम्ललवणौ रसौ॥52॥
स्वादुतिक्तौ ततः+ भूयः कषायकटुकौ ततः।
अन्योन्यप्रत्यनीकानां रसानां स्निग्धरूक्षयोः॥53॥
व्यत्यासात्+उपयोगेन क्रमात्+तं प्रकृतिं नयेत्।
सर्वंसहः स्थिरबलः+ विज्ञेयः प्रकृतिं गतः॥54॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां पञ्चमे कल्पसिद्धिस्थाने बस्तिव्यापत्सिद्धिः+नाम पञ्चमः+अध्यायः॥5॥

षष्ठः+अध्यायः।

अथ+अतः+ द्रव्यकल्पं व्याख्यास्यामः।

इति ह स्म+आहुः+आत्रेयादयः+ महर्षयः।

धन्वे साधारणे देशे समे सन्मृत्तिके शुचौ।

श्मशानचैत्यायतनश्वभ्रवल्मीकवर्जिते॥1॥

मृदौ प्रदक्षिणजले कुशरोहिषसंस्तृते।

अफालकृष्टे+अनाक्रान्ते पादपैः+बलवत्तरैः॥2॥

शस्यते भेषजं जातं, युक्तं वर्णरसादिभिः।

जन्त्वजग्धं दवादग्धमविदग्धं च वैकृतैः॥3॥

भूतैः+छायातपाम्ब्वाद्यैः+यथाकालं च सेवितम्।

अवगाढमहामूलम्+उदीचीं दिशमाश्रितम्॥4॥

[महेन्द्ररामकृष्णानां ब्राह्मणानां गवाम्+अपि।

तपसा तेजसा वा+अपि प्रशाम्यध्वं शिवाय वै॥1॥

मन्त्रेण+अनेन मतिमान् सर्वम्+अपि+औषधं नयेत्।]

अथ कल्याणचरितः श्राद्धः शुचिरुपोषितः।

गृह्णीयात्+औषधं सुस्थं स्थितं काले च कल्पयेत्॥5॥

सक्षीरं तत्+असम्पत्तौ+अनतिक्रान्तवत्सरम्।

ऋते गुडघृतक्षौद्रधान्यकृष्णाविडङ्गतः॥6॥

पयः+ बाष्कयणं ग्राह्यं विण्मूत्रं तत्+च नीरुजाम्।

वयोबलवतां धातुपिच्छशृङ्गखुरादिकम्॥7॥

कषाययोनयः पञ्च रसा लवणवर्जिताः।

रसः कल्कः शृतः शीतः फाण्टः+च+इति प्रकल्पना॥8॥

पञ्चधा+एव कषायाणां पूर्वं पूर्वं बलाधिका।

सद्यःसमुद्धृतात् क्षुण्णात्+यः स्रवेत्+पटपीडितात्॥9॥

स्वरसः सः+ समुद्दिष्टः कल्कः पिष्टः+ द्रवाप्लुतः।

चूर्णः+अप्लुतः शृतः क्वाथः शीतः+ रात्रिं द्रवे स्थितः॥10॥

सद्यः+अभिषुतपूतः+तु फाण्टः तन्मानकल्पने।

युञ्ज्यात्+व्याध्यादिबलतः+तथा च वचनं मुनेः॥11॥

मात्राया न व्यवस्था+अस्ति व्याधिं कोष्ठं बलं वयः।

आलोच्य देशकालौ च योज्या तद्वत्+च कल्पना॥12॥

मध्यं तु मानं निर्दिष्टं स्वरसस्य चतुष्पलम्।
पेष्यस्य कर्षम्+आलोड्यं तद् द्रवस्य पलत्रये॥13॥
क्वाथं द्रव्यपले कुर्यात्+प्रस्थार्धं पादशेषितम्।
शीतं पले पलैः षड्भिः चतुर्भिः+तु ततः+अपरम्॥14॥
स्नेहपाके तु+अमानोक्तौ चतुर्गुणविवर्धितम्।
कल्कस्नेहद्रवं योज्यम् अधीते शौनकः पुनः॥15॥
स्नेहे सिद्ध्यति शुद्धाम्बुनिःक्वाथस्वरसैः क्रमात्।
कल्कस्य योजयेत्+अंशं चतुर्थं षष्ठम्+अष्टमम्॥16॥
पृथक् स्नेहसमं दद्यात्+पञ्चप्रभृति तु द्रवम्।
न+अङ्गुलिग्राहिता कल्के न स्नेहे+अग्नौ सशब्दता॥17॥
वर्णादिसम्पत्+च यदा तत्+एनं शीघ्रम्+आहरेत्।
घृतस्य फेनोपशमः+तैलस्य तु तत्+उद्भवः॥18॥
लेहस्य तन्तुमत्ता+अप्सु मज्जनं सरणं न च।
पाकः+तु त्रिविधः+ मन्दः+चिक्कणः खरचिक्कणः॥19॥
मन्दः कल्कसमे किट्टे चिक्कणौ मदनोपमे।
किञ्चित्+सीदति कृष्णे च वर्त्यमाने च पश्चिमः॥20॥
दग्धः+अत ऊर्ध्वं निष्कार्यः स्यात्+आमः+तु+अग्निसादकृत्।
मृदुः+नस्ये, खरः+अभ्यङ्गे, पाने बस्तौ च चिक्कणः॥12॥
शाणं पाणितलं मुष्टिं कुडवं प्रस्थम्+आढकम्।
द्रोणं वहं च क्रमशः+ विजानीयात्+चतुर्गुणम्॥22॥
द्विगुणं योजयेत्+आर्द्रं कुडवादि तथा द्रवम्।
पेषणालोडने वारि स्नेहपाके च निर्द्रवे॥23॥
कल्पयेत्+सदृशान् भागान् प्रमाणं यत्र न+उदितम्।
कल्कीकुर्यात्+च भैषज्यम्+अनिरूपितकल्पनम्॥24॥
अङ्गानुक्तौ तु मूलं स्यात्+अप्रसिद्धौ तत्+एव तु।
[षड्वंश्यः+तु मरीची स्यात्, षण्मरीच्यः+तु सर्पषः।
तण्डूलः सर्षपाः+तु+अष्टौ, धान्यमाषः+तु तौ, यवः॥1॥
तावण्डिका चतुर्भिः+तैः+माषकः शाणकः+तथा।]
द्वौ शाणौ वटकः कोलं बदरं द्रक्षणः+च, तौ॥25॥
अक्षं पिचुः पाणितलं सुवर्णं कवलग्रहः।
कर्षः+ बिडालपदकं तिन्दुकः पाणिमानिका॥26॥
शब्दान्यत्वम्+अभिन्ने+अर्थे शुक्तिः+अष्टमिका पिचू।

पलं प्रकुञ्चः+ बिल्वं च मुष्टिः+आम्रं चतुर्थिका॥27॥

द्वे पले प्रसृतस्तौ द्वौ+अञ्जलिस्तौ तु मानिका।

आढकं भाजनं कंसः+, द्रोणः कुम्भः+ घटः+अर्मणम्॥28॥

तुला पलशतं, तानि विंशतिः+भारः+ उच्यते।

हिमवद्विन्ध्यशैलाभ्यां प्रायः+ व्याप्ता वसुन्धरा॥29॥

सौमं पथ्यं च तत्र+आद्यम्+आग्नेयं वैन्ध्यम्+औषधम्॥29 1/2 ॥

इति श्रीवैद्यपतिसिंहगुप्तसूनुश्रीमत्+वाग्भटविरचितायाम्+अष्टाङ्गहृदयसंहितायां पञ्चमे कल्पसिद्धिस्थाने द्रव्यकल्पः+ नाम षष्ठः+अध्यायः॥6॥